नदः-[1]नदी, [2]कलहंसनादिनी,[A] अम्भोदनादी-खरनादी, अर्णवघीरनादिनी,[B]

नदितव्यम्, नादयितव्यम्, निनदिषितव्यम्, नानदितव्यम्;

नदनीयम्, नादनीयम्, निनदिषणीयम्, नानदनीयम्;

नाद्यम्, नाद्यम्, निनदिष्यम्, नानद्यम्;

ईषन्नदः-दुर्नदः-सुनदः; — —

नद्यमानः, नाद्यमानः, निनदिष्यमाणः, नानद्यमानः;

नादः, [3]निनदः-[C] निनादः, नादः, निनदिषः, नानदः;

नदितुम्, नादयितुम्, निनदिषितुम्, नानदितुम्;

नत्तिः, नादना, निनदिषा, नानदा;

नादः, नादः, निनदिषुः, नानदः;

नदनम्, नादनम्, निनदिषणम्, नानदनम्;

नदित्वा, नादयित्वा, निनदिषित्वा, नानदित्वा;

प्रणद्य, प्रणाद्य, प्रणिनदिष्य, प्रणानद्य;

[4]सिंहनादं विनद्य,

नादम् २, } नादम् २, } निनदिषम् २, } नानदम् २; }
नदित्वा २, } नादयित्वा २, } निनदिषित्वा २, } नानदित्वा २. }

[5]नदनुः,

---

1. पचादिषु (3-1-134) नदट् इति पाठात् टित्त्वम्। तेन स्त्रियां ङीप्।

2. 'कर्तर्युपमाने' (3-2-79) इति णिनिः। कलहंस इव नदतीति **कलहंसनादिनी**। एवं **अम्भोदनादी, खरनादी** इत्यत्रापि ज्ञेयम्।

3. 'नौ गदनदपठस्वनः' (3-3-64) इति निपूर्वकात् अब्विकल्पः। पक्षे घञ्।

4. 'उपमाने कर्मणि च' (3-4-45) इति णमुल्प्रत्ययः। 'कषादिषु यथाविध्यनुप्रयोगः' (3-4-46) इति पूर्वप्रयुक्तस्यैव धातोर्णमुल्प्रयोजकस्यानुप्रयोगः।

5. 'चनुक् नदेश्च' (द. उ. 1-139) इति चनुक्प्रत्यये रूपम्। **नदनुः**=मेघः।

A. 'पयोऽवगाढुं **कलहंसनादिनी** समाजुहावेव वधूः सुरापगा॥'
**किरातार्जुनीये** 8.27.

B. 'ततः प्रकोष्ठे हरिचन्दनाङ्किते प्रमथ्यमाना**र्णवधीरनादिनीम्**।' रघुवंशे 3.59.

C. 'श्रुत्वा विस्फूर्जथुप्रख्यं **निनादं** परिदेविनी।' भ. का. 5.53.